M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 231

Title: Putra Pratigraha Prayoga

231

Putria Pratigraha Prayoga		Title
		Author
		Editor
		Year, Vols.
		Publisher
231		Remarks

श्रीगणेशायनमः॥ अथबह्वृचाधिकारिशौनकोक्तरीत्यापुत्रप्रतिग्रहप्रयोगः॥ पूर्वेद्युःकृतो
पवासः वाससीकुंडले छत्रंउष्णीषंचांगुलीयकं। आचार्यंधर्मसंयुक्तं वैष्णवंवेदपारगं।
बर्हिःकुशमयंचैव इध्मंपालाशमेवच। एतान्याहृत्यबंधूंश्च ज्ञातीनाहूययत्नतः।
पवित्रपाणिःप्राणानायम्यदेशकालौसंकीर्त्य ममअप्रजत्वप्रयुक्तपैतृकऋण
पाकरणपुन्नामनरकत्राणद्वाराश्रीपरमेश्वरप्रीत्यर्थंशौनकोक्तविधिनापुत्रप्र
तिग्रहंकरिष्ये॰ तदंगस्वस्तिपुण्याहवाचनं आचार्यवरणंआचार्यस्यमधुपर्केणा
र्हणंविष्णुपूजनंबंधुवर्गब्राह्मणेभ्योन्नदानंचकरिष्ये॰ तदादौनिर्विघ्नतासिध्यर्थं
गणपतिपूजनंकरिष्ये इतिसंकल्प्यवरणांतंकृत्वामधुपर्कांतेपितॄणांकुलदेवता
नांगुरूणांप्रीत्यर्थंब्राह्मणान्बंधूंश्चभोजयेत्। ततःआचार्यःदेशकालौसं
कीर्त्ययजमानानुज्ञयापुत्रप्रतिग्रहांगत्वेनविहितहोमंकरिष्ये। अग्निप्रति
ष्ठापनांतंकृत्वान्वाधानंकुर्यात्। चक्षुषीआज्येनेत्यंते। अत्रप्रधानंसकृ

दग्निं षड्वारं सूर्यासावित्रीं चरुणा अग्निं वायुं सूर्यं प्रजापतिं च आज्येन शेषेण स्विष्ट
कृतं इत्यादि अष्टाविंशति मुष्टीन् तूष्णीं निरूप्य तान् चरुं कृत्वा प्रोक्ष्य आज्योत्पवनांतं कृत्वा
ब्राह्मणैः सह दातुः समक्षं गच्छेत्। दातारं प्रति अस्मै पुत्रं देहीति ब्राह्मणद्वारा याच्ञां
कारयेत्। ततो दाता आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं
पुत्रदानं करिष्ये इति संकल्प्य गणपतिं संपूज्य यथाशक्ति चंदनादिना प्रतिगृहीता
रं संपूज्य ये यज्ञेति पंचानां नाभानेदिष्ठो मानव ऋषिः विश्वेदेवा देवता आद्या
श्चतस्रस्त्रिष्टुभः। पंचम्यनुष्टुप्। पुत्रदाने विनियोगः ये यज्ञेन दक्षिणया सम०
परिजज्ञिरे इत्यंते इमं मंत्रं तत उपेत्य कर्णपाकरणपुन्नाम नरकत्राण सिध्यर्थं आ
त्मनश्च श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं संप्रददे न मम प्रतिगृह्णातु भवानित्युक्त्वा पुत्रं
प्रतिगृहीतृहस्ते साक्षतजलं क्षिपेत्। ततः प्रतिगृहीता देवस्य त्वेति मंत्रेण हस्तद्वयेन प्र
तिगृह्य स्वांके उपविश्य अंगादंगादिति शिशुमूर्धन्याजिघ्रेत्। ततो युवं वस्त्राणी
ति वस्त्रं परिधाप्य तत्पश्चात् मुद्रिकां बध्वा कुंकुमादिना तिलकं कृत्वा हिरण्यक

पश्त्यादिना कुंडलादिभिरलंकृत्य छत्रेणाच्छादितं बालं नृत्यगीतवाद्यैः स्वस्ति नो मिमीतामि
त्यादिमंत्रैश्च गृहमानीय हस्तपादौ प्रक्षाल्याचम्य अग्नेः पश्चिमतो मातुरुत्संगे स्वदक्षि
णतो बालमुपविश्य आचार्यदक्षिणतः स्वयमुपविशेत्। ततः आचार्यो बर्हिरास्तरणा
दि आज्यभागांतं कुर्यात्। ततः रुचं मवदानविधिनावदाय यस्त्वा हृदा कीरिणेति द्व
योरात्रेयो वसुश्रुत ऋषिः। अग्निर्देवता त्रिष्टुप् छंदः। पुत्रप्रतिग्रहांगहोमे वि० यस्त्वा
हृदा कीरिणा० स्वस्ति ऋग्द्वयं क्रमेण पठित्वा स्वाहेति जुहुयात्। यजमानः अग्ने
यद्दं पुनरवदाय तुभ्यमग्ने इति मंत्रस्य सूर्यासावित्री सूर्याविस्त्वनुष्टुप्। पुत्र
परिग्रहांगत्वेन होमे०। तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतु० सह स्वाहा। सूर्यासावित्र्या इदं०। पु
नरवदाय। सोमो ददद् इति पंचानां सूर्यासावित्री ऋषिः सूर्यासावित्री देवता आ
द्ये द्वे अनुष्टुभौ। तृतीया जगती। चतुर्थी त्रिष्टुप्। पंचम्यनुष्टुप्। पुत्रप्र०। सर्वत्र
सूर्यासावित्र्या इति त्यागः ततो व्यस्तसमस्तव्याहृतिभिराज्यं हुत्वा स्विष्टकृतं

पुत्रप्रति· रिहोमशेषं समाप्य आचार्याय धेनुं दद्यात्। दशत्रीन्ब्राह्मणान्भोजयेत्। कर्मणः
२ संपूर्णतां वाचयित्वा ईश्वरार्पणं कुर्यात्। इति शौनकोक्तपुत्रपरिग्रहप्रयोगः। एवं यजु
र्वेदिकर्तृको बौधायनोक्तरीत्या प्रयोगो बोद्धव्यः। ततः प्रागसंस्कृतस्य स्वस्तिवाचनं
नांदीश्राद्धादिपूर्वकं जातकर्मादिसंस्कारान् करिष्ये। इति विशेषः। अथ दत्तकस्य वि
वाहाद्युपयोगिगोत्रादिनिर्णयः। तत्र यश्च प्रतिग्रहीत्रा जातकर्मादिभिश्चूडादिभिर्वा
संस्कृतस्तद्देकगोत्रः। एतमभिप्रेत्यैव गोत्ररिक्थे जनयितुर्न भजेत्कृत्रिमः सुत इति शा
स्त्रमपि प्रवृत्तं। एतद्भिन्नस्य प्रतिगृहीत्रोपनयनमात्रसंस्कृतस्तदुत्तरप्रतिग्रहीतो वाहेव
रातवद्विगोत्रत्वमिति व्यवस्था। प्रागपादितयाप्येषा व्यवस्था अभिवादनश्राद्धादि
गतगोत्रनिर्देशार्था। विवाहे तु दत्तकमात्रेण बीजप्रतिग्रहीत्रोः पित्रोर्गोत्रप्रवरवर्ज
नं कार्यं। प्रवरमंजर्यादिग्रंथेषु निबंधग्रन्थेषु तथोक्तेः। इति गोत्रनिर्णयः। बाल २
यास्थ्य केशवभट्टेन लिखितं श्रीराम्।